विद्या भवन बालिका लिद्यापीठ,लखीसराय

वर्ग नवम विषय संस्कृत शिक्षक श्यामउदय सिंह

पाठः द्वितीयः पाठनाम स्वर्णकाकः

ता:02-05-2021 (एन.सी.ई.आर.टी.पर आधारित)

सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता वृक्षस्योपरि विलोक्य सा चाश्चर्यचकिता
सञ्जाता यत्तत्र स्वर्णमयो प्रासादो वर्तते ।यदा काकः शयित्वा प्रबुद्धस्तदा
तेन स्वर्णगवाक्षात् कथितं हंहो बाले! त्वमागता,तिष्ठ ,अहम् त्वत्कृते सोपानमवतारयामि ,तत्कथय स्वर्णमयं, रजतमयं,ताम्रमयं वा ?कन्या प्रावोचत् -अहं निर्धनमातुर्दुहिता अस्मि।ताम्रसोपानेन आगमिष्यामि। परं स्वर्णसोपानेन सा स्वर्ण-भवनमाससाद ।

- ***एकपदेन उत्तरत***

  क. सूर्योदयात् पूर्वमेव का तत्र उपस्थिता !

  ख. कन्या कस्याः दुहिता आसीत्?

- ***पूर्णवाक्येन उत्तरत***

  क. स्वर्णगवाक्षात् काकेन किं कथितम् ?

  ख. कन्या किं प्रावोचत् ?

- ***भाषिक कार्य***

  (I) 'अधः' पदस्य विपर्ययः किं ? (क) तिष्ठ (ख) उपरि (ग) तत्र (घ) पूर्वम्

  (II) 'अहम् निर्धनमातुः दुहिता अस्मि'। अत्र क्रिया पदम् किं ? (क) निर्धन (ख)मातुः (ग)दुहिता (घ) अस्मि

(III) अनुच्छेदे 'ताम्रमयं सोपानम् ' अनयोः पदयोः विशेषणपदं किं ?

(क) ताम्रमयम् (ख) ताम्रम् (ग) सोपानः (घ) सोपानणम्